## अध्याय :- ६३ Chapter-63

सूत उवाच ।।[१]

अश्वत्थलाक्षावहनी च सर्षपान्केसरप्लुतान् ।।
जुहुयतो मंत्रमुख्यैश्च बलातिबल संज्ञकैः ।। १

यामे तु प्रथमे याते काचिन्नारी समाययौ ।।
शोणितार्क्तकवसना महोच्चोर्ध्व शिरोरुहा ।। २

दारुणाक्षी शुक्लदन्ती भयस्यापि भयंकरी ।।
सा रुरोद महारावं प्राप्य तां होमभूमिकाम् ।। ३

तां दृष्ट्वा चुक्षुभे सद्यो विजयो भीति मानव ।।
बर्बरीकश्च निर्भीतिस्तस्याः संमुखमाययौ ।। ४

ततः कंठं समाश्लिष्य तस्या मतिमतां वरः ।।
रुरोद द्विगुणं वीरो मेघवन्नादयन्बहु ।। ५

~~तं[२] दृष्ट्वा विस्मिता मेघवन्नादयन्बहु ।। सा च यावन्मुंचति कर्तिकाम् ।।~~

तं दृष्ट्वा विस्मिता सा च यावन्मुंचति कर्तिकाम्[३] ।।
तावन्निष्पीडिते कंठे मोक्तुं तस्मिन्न चा शकत ।। ६

पीड्यमाने च बलिना कंठे तस्या मुहुर्मुहुः ।।
मुमोच विविधां शब्दान्वज्राहत इवाचलः ।। ७

---

१ अ. प्रतौ इत्ययं पाठः नास्ति ।
२ ब. तां
३ ब. कर्तितं

क्षणं रावास्ततो मुक्ता त्राहि मुंचेति वक्तुमुणुक ।।
ततः कृपालुना मुक्ता पादयोः[१] पतिता ऽब्रवीत् ।। ८

शरणं ते प्रपन्नास्मि दासी कर्मकरी तव ।।
महाजिह्वेति मां विद्धि राक्षसीं कामरूपिणीम् ।। ९

काशीश्मशान[२] निलयां देवदानव दर्पहाम् ।।
अस्मिन्नर्थे स्वदेवस्य शपथा मे तथात्मनः ।। १०

ददासि यदिमे वीर दुर्लभां प्राणदक्षिणाम् ।।
ततस्तपश्चरिष्यामि सर्वभूताभयप्रदा ।। ११

तथैतद्व्यत्ययं कुर्यां भस्मीभूयां ततः क्षणम्[३] ।।
एवं ब्रुवाणां तां वीरो निगृह्य शपथैर्दृढम् ।। १२

मुमोच सापि सत्दष्टा कृच्छ्रान्मुक्ता[४] ययौ वनम् ।।
सोऽपि वीरः खड्गधारी तत्रैवावस्थितोऽभवत् ।। १३

ततो मध्यरात्रौ च गर्जितं श्रूयते महत् ।।
अंधकारं च संजज्ञे तमोऽघनरक प्रभम् ।। १४

---

१ ब. यो
२ 'कासी स्मशान' अ. ब. पाठः ।
३ अ. क्षणात्
४ अ. वनं ययौ ।।

ददृशे च ततः शैलः शतश्रृंगो ऽति विस्तरः ।।
नानाशिलाः प्रमुमुचे नानावृक्षांश्च सोच्छ्रयान् ।। १५

नानानिर्झर संघोघं ववृषे शोणितं बहु ।।
तं तथा नगमालोक्य निर्भीतो भैमिनंदनः ।। १६

पर्वतो द्विगुणो भूत्वा पर्वतं सहसाप्लुतः ।।
पदा[1]भिजघ्ने संत्वदत्य पर्वतं स्वेन भूभृता ।। १७

तदा विशीर्णः सो ऽभुच्च पर्वतो भूमि मंडले ।।
ततो योजन देहात्मा शतशीर्षः शतोदरः ।। १८

वक्रैर्मुंचन्महाज्वालां रेफलेन्द्रो ऽभ्य धावत् ।।
तं धावमानं द्रष्ट्वैव बर्बरीको महाबलकः ।। १९

विधाय तादृशं रूपं नर्दन्तं चाप्यधावत ।।
ततो मध्यमरात्रौ तौ लघु चित्रं च सुष्ठु[2] च ।। २०
युयुधाते बाणजालैर्यथा प्रावृषि तोयदौ ।।
छिन्नचापौ च खड्गाभ्यां छिन्नखड्गौ च मुष्टिभिः ।। २१

---

१ अ. ब. यदा
२ अ. सुष्टु

पर्वताविव सत्पक्षौ चिरं युयुधतुः स्थिरम् ।।
ततः कक्षौ समुत्पाप्य भ्रामयित्वा मुहूर्तकम् ।। २२

भूमौ प्रघर्षयामास प्रसुतं च मुमोच ह ।।
चिक्षेप चाग्निकोणे ~~श~~ तं महीसागर रोधसि ।। २३

तद्दूरे[१] रैपलेन्द्राख्यं ग्राममद्यापि वर्तते ।।
एवं स रैपलोनाम[२] वृत्र तुल्य पराक्रमः ।। २४

नाथः[३] श्मशानस्यावन्त्या विघ्नकृन्निहतोऽभवत् ।।
तं निहत्य पुनर्वीरो बर्बरीकः स्थितोऽभवत् ।। २५

तत स्तृतीययामे च प्रतीच्या दिश आययौ ।।
पर्वताभा महानादा पादैः कम्पयतीव भूः ।। २६

दुहद्रुहाख्याक्षतरी मेघभ्रष्टा तडिद्यथा ।।
तामायांतिं तथा ~~मेघभ्रष्टा~~ दृष्ट्वा सूर्यविश्वानरप्रभाम् ।। २७

उपप्लुत्य जवाद्भूमिमी ~~सा~~ रुरोह प्रहसन्निव ।।
वेगात्तत्रः प्रद्रवतीं[४] तुंडे प्राहत्य मुष्टिभिः ।। २८

---

१ अ. 'तत्र' इति स्यात्

२ ब. रैफलोनाम

३ ब. नाथ

४ अ. प्रदेवंती

स्थापयामास तत्रैव तस्थौ सा चातिपीडिता ॥
ततः क्रुद्धा महारावं कृत्वालुत्य दुहद्रुहा ॥ २९

जगत्यामाशु चिक्षेप बर्बरीकं तथेच्छकम् ॥
ततो नदित्वा चातीव पादघातममुंचत ॥ ३०

पादौ च वीरः संगृह्य चिक्षेप भुवि लीलया ॥
ततः पुनः समुत्थाय धावंती तां निगृह्य सः[१] ॥ ३१

मुष्टिना पातयित्वैवं दंतान्कंठम् पीडयत् ॥
क्लिन्नं वास इवापीडय प्राणानत्याजयद्रुतम् ॥ ३२

एवं सीकोत्तरस्थाने[२] स्मशानैकऽपदोद्भवा ॥
शाकिनीनामधीशा सा बर्बरीकेण सूदिता ॥ ३३

हत्वा तां चापि चिक्षेप प्रतीच्यामिव लीलया ॥
दुहद्रुहाख्यमद्यापि तत्र ग्राम[३]स्मवर्तते ॥ ३४

ततस्तथैव संतस्थौ बर्बरीकोऽभिरक्षणे ॥
ततश्चतुर्थे यामे च प्राप्तः क्षपणकोऽद्भुतः ॥ ३५

---

१ ब. तः
२ अ. ब. शीकोत्तरस्थाने
३ अ. ग्रामं

मुंडी नग्नो मयूराणां पिच्छधारी महाव्रतः ।।
प्रोवाच चेदं वचनं हाहा कष्टमतीव भोः ।। ३६

अहिंसा परमो धर्मस्तदग्निर्ज्वाल्यते कुतः ।।
हूयमाने यतो वह्नौ सूक्ष्मजीववधो महान् ।। ३७

श्रुत्वेदं वचनं तस्य बर्बरीको ऽब्रवीत्स्मयन् ।।
वदने सर्वदेवानां हूयमाने स्म पावके ।। ३८

अनृतं भाषसे पाप शिक्षायोग्यो ऽसि दुर्मते ।।
इत्युक्त्वा सहसोत्पत्य कक्षामध्ये[1] स्थिरो स्य च ।। ३९

दन्तान्मुष्टि प्रहारैश्च समाहत्याभ्य पातयत् ।।
रुधिराविल वक्त्रं[2] तं मुमोच पतितं भुवि ।। ४०

स क्षणाच्चेतनां प्राप्य घोरदैत्यवपुर्धरः ।।
भयाद्भीमेः प्रदुद्राव गुहाविवरमाविशत् ।। ४१

बहुप्रभेति नगरी षष्टियोजनमायता ।।
तस्यां विवेश सहसा तं चानु[3] बर्बरीककः ।। ४२

---

१ अ. कक्षायांतः
२ अ. चक्रं
३ ब. चातु

बर्बरीकं ततो दृष्ट्वा नोदो भूच्च पलाशिनाम् ।।
धावध्वं हन्यतामेष छिद्यतां भिद्यतामिति ।। ४३

तच्छ्रुत्वा दैत्यवीराणां कोटयो नव[1] भीषणाः ।।
नानायुधधरा वीरं बर्बरीकमुपाद्रवन् ।। ४४

दृष्ट्वा तान्कोटिशो दैत्यान्क्रुद्धो भीमात्मजात्मजः[2] ।।
निमील्य सहसा नेत्रे तेषां मध्यम धावत् ।। ४५

पादघातैस्ततः कांश्चिद्भुजाघातैस्तथापरान् ।।
हृदयस्याभिघातैश्च क्षणान्निन्ये यमक्षयम् ।। ४६

यथा [3]नलवनं क्रुद्धः कुर्याद्भूमिसमं करी ।।
नव कोटीस्तथा जघ्ने सह तेन पलाशिना ।। ४७

ततो नागाः समागम्य[4] वासुकिप्रमुखास्तदा ।।
तुष्टुवुर्विविधैर्वाक्यैः रूरुचुः सुत्ददयं च ते ।। ४८

नागानां परमं कृत्यं कृतं ते भैमिनंदन ।।
पलाशीनाम दैत्योयं नीतो यत्सानुगो यमम् ।। ४९

---

१ अ. जन

२ ब. जाः

३ अ. नलो

४ अ. समाजग्मु

अनेन हि वयंवीर सानुगेन दुरात्मना ।।
पीडिता विविधोपायैः पातालादप्यधः कृताः[1] ।। ५०

वरं वृणीष्व त्वं तस्मान्नागेभ्यो ऽभिमतं परम् ।।
वरदाः सर्व एव स्म वयं तुभ्यं सुतोषिताः ।। ५१

सुत्ददय उवाच ।।[2]
यदि देयो वरो मह्यं तदेनं प्रवृणोम्यहम् ।।
सर्व विघ्न विनिर्मुक्तो विजयः सिद्धिमाप्नुयात् ।। ५२

ततस्तथेति तं प्रोचुः प्रत्दष्टा वाकुभोजनाः ।।
स च तेभ्यः पुरीं दत्त्वा निवृतो नागपूजितः ।। ५३

विवरस्य च मध्येन समागच्छन्महाप्रभम् ।।
सर्वरत्नमयं लिंगं स्थितं कल्पतरो रधः ।। ५४

अर्च्यमानं सुबह्वीभिर्नाग कन्याभिरैक्षत ।।
ततो ऽसौ विस्मयाविष्टो नागकन्या ह्यपृच्छत् ।। ५५

केनेदं स्थापितं लिंगं सूर्य वैश्वानर प्रभम् ।।
लिंगादपि चतुर्दिक्षु मार्गाश्चैमे तु कीदृशाः ।। ५६

---

१ अ. ब. 'कृतः'
२ अ. सहृदय ।।

इति वीरवचः श्रुत्वा बृहत्कटि ऽपयोधरा[१] ।।
सव्रीडं सस्मितापांग निर्मोक्षमिदम ब्रवीत्[२] ।। ५७

सर्वपन्नगराजेन शेषेण सुमहात्मना ।।
तपस्तप्त्वा महालिंगमिदमत्र प्रतिष्ठितम्[३] ।। ५८

दर्शनात्स्पर्शनाद्ध्या ऽनादर्चनात्सर्व ऽसिद्धिदम् ।।
लिंगात्पूर्वेण मार्गोयं याति श्री पर्वतं भुवि ।। ५९

एलापत्रेण विहितो नागानां तत्र प्राप्तये ।।
दक्षिणेन च मार्गोऽयं याति शूर्पारकं[४] भुवि ।। ६०

कर्कोटकेन नागेन कृतोऽयं तत्र प्राप्तये ।।
पश्चिमेन च मार्गोऽयं प्रभासं याति सुप्रभम् ।। ६१

ऐरावतेन विहितो नागानां गमनाय च ।।
उत्तरेण च मार्गोयं येन यातुं भवान्स्थितः ।। ६२

गुप्तक्षेत्रे सिद्धलिंगं याति शक्तिगुहा[५]ऽकृतः ।।
विहितस्तक्षकेणासौ यातुं तत्र महात्मना ।। ६३

---

१ अ. ब. धराः
२ अ. ब्रवन्
३ अ. प्रतिष्टितं
४ अ. सूर्पारकं ब. सूर्याकरं
५ अ. गुहः

इतीदं वर्णितं वीर विज्ञप्तिः श्रूयतां मम ।।
को भवानधुनैवेतो दैत्यपृष्ठ गतोऽभवत् ।। ६४

वयं च सर्वास्ते दास्यस्त्वां पतिं प्रवृणीमहे ।।
अस्माभिः सहितः क्रीड विविधास्वत्र भूमिषु ।। ६५

बर्बरीक उवाच[1] ।।
अहं कुरुकुलोत्पन्नः पांडुपुत्रस्य पौत्रकः ।।
बर्बरीक इति ख्यातस्तं दैत्यं हंतुमागतः ।। ६६

स च दैत्यो हतः पापः[2] पुनर्यास्यै महीतलम् ।।
भवतीभिश्च मे नास्ति कृत्यं भो भोः[3] कथंचन् ।। ६७

बह्मचारिव्रतं यस्मादहं सततमास्थितः ।।
इत्युक्त्वाभ्यर्च्य तल्लिंगं प्रणिपत्य च दंडवत् ।। ६८

ऊर्ध्वमाचक्रमे वीरः कातरं ताभिरीक्षितः ।।
ततोबहिः समागत्य सप्रकाशं मुखं[4] तदा ।। ६९

प्रहर्षणैव पूर्वस्या विजयं मद्रशे दिशः ।।
तस्मिन्काले च विजयः कर्म सर्वं समाप्तवान् ।। ७०

---

१ अ प्रती 'उवाच' नास्ति ।
२ ब. पाप
३ अ. भो
४ अ. ब. 'मुखे'

कांत्या सूर्यसमाभास ऊर्ध्वमाचक्रमे क्षणात् ।।
ततो वियद्गतं देवैः पुष्पवर्षमभून्महत् ।। ७१

जगुर्गंधर्व मुख्याश्च ननृतुश्चाप्सरो गणाः ।।
विजयो बर्बरीकं च ततो वचनमब्रवीत् ।। ७२

तव प्रसादाद्वीरेश सिद्धिः[1] प्राप्ता मयातुला ।।
चिरं जीव चिरं नंदचिरं वस[2] चिरं जय ।। ७३

अत एव हि साधूनां संगमिच्छंति साधवः ।।
औषधं सर्वदोषाणां भवेत्सत्संगमो यतः ।। ७४

त्वं च होमस्थितं भस्म सिंदूर सद्रश प्रभम् ।।
निःशल्यं सविवरकं पूर्यमाणं गृहाण च ।। ७५

अक्षप्यमेतत्संग्रामे प्रथमं ते प्रमुंचतः ।।
शत्रूणां स्थानकं मृत्योर्देहं ध्वस्तं करिष्यति ।। ७६

एवं सुखेन विजयः शत्रूणां ते भविष्यति ।। ७७

---

१ अ. प्रसिद्धिः ब. सिद्धि
२ अ. प्रतौ 'तेन' स्यात् ।

बर्बरीक उवाच[१] ।।
[२]अपकुर्यान्निराकांक्षो यः स साधुरितीर्यते ।।
साकांक्षामुपकुर्याद्यः साधुत्वे तस्य को गुणः ।। ७८

तद्देहिभस्म चान्यस्मै केनाप्यर्थो न मे ऽप्यपि ।।
श्री प्रसादसुमुखां दृष्टिं विना नान्यद्वृणोमि ते ।। ७९

देवा ऊचुः ।।[३]
कुरूणां पांडवानां च भविष्यति महान्रणः ।।
ततो भूमिस्थितं भस्म प्राप्स्यंति यदि कौरवाः ।। ८०

महाननर्थो भविता पांडवानां ततः[४] स्फुटम् ।।
तस्माद्गृहाण त्वं भस्म सोपि चक्रे तथा वचः ।। ८१

देवीभिः सहिता देवाः संमान्य विजयं च ते ।।
सिद्धिश्रेष्ठं ददुस्तस्मै सिद्धसेनेति नाम च ।। ८२

एवं स विजयो विप्रः[५] सिद्धिं लेभे सुदुर्लभाम् ।।
बर्बरीकश्च कृत्वैतद्देवी भक्तिरतो ऽवसत् ।। ८३

६ इति श्री स्कंदे....कार्य सिद्धिवर्णनं नाम त्रिषष्टितमो ऽध्यायः ।।

---

१ अ. प्रतौ 'उवाच' नास्ति ।
२ ब. उपकुर्या
३ ब. देवाऊचुः ।।
४ ब. तत्र
५ अ. विप्राः
६ अ. इति कुमारिकाखंडे विजय सिद्धिः ।।
ब. इति श्री स्कंदपुराणे कुमारिका खंडे सिद्धिः चतुर्थषष्टशो ऽध्यायः ।।